## यथामुखसम्मुखस्य दर्शनः खः। (६/१८०७)

यथामुखशब्दात् सम्मुखशब्दात् [1]षष्ठीसमर्थाद् दर्शनः इत्येतस्मिन्नर्थे खः [2]प्रत्ययो भवति। दृश्यतेऽस्मिन् इति दर्शनः आदर्शादिः प्रतिबिम्बाश्रय उच्यते। निपातनात् सादृश्येऽव्ययीभावः। यथामुखं दर्शनः यथामुखीनः। [3]सर्वस्य मुखस्य दर्शनः सम्मुखीनः॥

## तत्सर्वादेः पथ्यङ्गकर्मपत्रपात्रं व्याप्नोति। (७/१८०८)

तत् इति द्वितीया समर्थविभक्तिः। [4]व्याप्नोति इति प्रत्ययार्थः। [5]परिशिष्टं प्रकृतिविशेषणम्। सर्वादेः प्रातिपदिकात् पथिन् अङ्ग कर्मन् पत्र पात्र [6]इत्येवमन्ताद् [7]द्वितीयासमर्थाद् व्याप्नोति इत्यस्मिन्नर्थे खः प्रत्ययो भवति। सर्वपथं व्याप्नोति सर्वपथीनो रथः। सर्वाङ्गीणः तापः। सर्वकर्मीणः पुरुषः। सर्वपत्रीणः सारथिः। सर्वपात्रीणः ओदनः॥

## आप्रपदं प्राप्नोति। (८/१८०९)

प्रपदम् इति पादस्याग्रमुच्यते। आङ् मर्यादायाम्। तयोरव्ययीभावः। आप्रपदशब्दात् तदिति द्वितीयासमर्थात् प्राप्नोति इत्येतस्मिन्नर्थे खः प्रत्ययो भवति। आप्रपदं प्राप्नोति आप्रपदीनः पटः। शरीरेण असम्बद्धस्यापि पटस्य प्रमाणमाख्यायते॥

## अनुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु। (९/१८१०)

अनुपदादिभ्यः [8]शब्देभ्यः तदिति द्वितीयासमर्थेभ्यः यथासङ्ख्यं बद्धा भक्षयति नेय इत्येतेष्वर्थेषु खः प्रत्ययो भवति। अनुः आयामे सादृश्ये वा। अनुपदं बद्धा उपानत् अनुपदीना। पदप्रमाणा इत्यर्थः। सर्वान्नानि भक्षयति सर्वान्नीनो भिक्षुः। [9]अयः प्रदक्षिणम्, अनयः प्रसव्यम्। प्रदक्षिणप्रसव्यगामिनां शाराणां यस्मिन् परशारैः [10]पदानामसमावेशः सोऽयानयः। अयानयं नेयः अयानयीनः शारः (म.भा. २.३७३)। [11]फलक[12]शिरःस्थित इत्यर्थः॥

## परोवरपरम्परपुत्रपौत्रमनुभवति। (१०/१८११)

परोवर परम्पर पुत्रपौत्र इत्येतेभ्यः[13] तद् इति द्वितीयासमर्थेभ्यः अनुभवति इत्यस्मिन्नर्थे खः प्रत्ययो भवति। परोवर इति [14]परस्योत्वं प्रत्ययसंनियोगेन निपात्यते। परांश्चावरांश्चानुभवति परोवरीणः (म. भा. २. ३७३)। [15]परपरतराणां च परम्परभावो निपात्यते। परांश्च परतरांश्चानुभवति परम्परीणः। पुत्रपौत्राननुभवति पुत्रपौत्रीणः[16]। [71]परम्परशब्दो विनापि प्रत्ययेन दृश्यते, [18]मन्त्रिपरम्परा मन्त्रं भिनत्ति इति[19]। तच्छब्दान्तरमेव द्रष्टव्यम्॥

---

1. च इत्यधिकम् क.फ. 2. प्रत्ययः नास्ति फ. 3. संमुखस्य दर्शनः फ, सम्यक् मुखं संमुखम्, संमुखस्य दर्शनः क. ह. 4. प्राप्नोति ह. 5. परिशिष्टः फ, प्रत्ययार्थमिष्टं प्रकृतिविशेषणम् क. 6. इत्यन्तात् फ. 7. तद् इत्यधिकम् फ. ह. 8. परे इत्यधिकम् क, परैः शब्दैः इत्यधिकम् ब. ह, शब्देभ्यः नास्ति ह. 9. अयम् ह, अयः प्रदक्षिणगमनम्, अनयः सव्यगमनम् ड. 10. पदानाम् नास्ति ह. 11. प्रथमसंनिवेशितः क. 12. शिरसि स्थितः ड. 13. प्रातिपदिकेभ्यः इत्यधिकम् ब. क, शब्देभ्यः इत्यधिकम् फ. 14. परस्य अवरस्य ओत्ववचनम् फ, परस्य ओद्वचनम् ड. 15. पराणाम् इतराणाम् च फ. 16. वृद्धः इत्यधिकम् ब.क.फ. 17. कथं परोवर्ये पराशब्दः इत्यधिकम् ड. 18. सेयम् इत्यधिकम् क, सैषा इत्यधिकम् ड. 19. नैष दोषः इत्यधिकम् क.ड.